# यूरोप–वासिनां दृष्ट्यामष्टादश–शताब्दद्याः भारते ज्ञानं विज्ञानं कला च''

**डॉ. आकाँक्षा शर्मा बाजपेयी***

धर्मपालेन रचितः ''Indian Science and Technology in the Eighteenth Accounts''

प्राचीन–भारतीय–वैज्ञानिक–पैतृकधनस्यैकोबहुमूल्यकैतिहासिकोऽभिलेखोऽस्ति। अस्याभिलेखस्यावलोकनोपरान्ते तु भवता अयं विश्वासः कर्त्तव्यो भविष्यति यद् भारते टीकाकरणस्य पद्धत्या इतिहासोऽद्यारम्भ न्यूनातिन्यूनः पञ्चशतवर्षाणि प्राचीनोऽस्ति।

षोडश–शताब्द्यां शीतलायाः निवारणाय प्रायशः सम्पूर्णभारते सुस्थापितायाः टीकाकरणस्य पद्धत्याः तदा यूरोपदेशाः सम्पूर्णतया अनभिज्ञा आसन्। अविश्वसनीयस्येव प्रतीयतस्यास्य सत्यस्यानावरणं बहूनां यूरोपीयानां तैरनेकैः पत्रैः भवति ये यूरोपीयाः विभिन्न–कार्येभ्यस्तत्कालीनभारते कस्मैचित् समयाय आगत्यावसन्। सन् 1720 ईस्वीतः पूर्वं यावत् सम्पूर्णेव यूरोपः टीकाकरणं नाजानत्। तदा शीतलैका प्राणधातकरोगस्य रूपे कुख्याता आसीत्। भारतम् आवकेषु यूरोपीयेषु इमं (रोगं) प्रति अधिकं भयं व्याप्तमासीत् यत्किं यूरोपीयेषु भारतीयानामपेक्षा शीतलायाः कारणेन भवितव्यः मृत्यु–क्रमोऽधिक आसीत्। यूरोपीयैरेकत्रितायाः अभिज्ञताया अनुसारं टीकाकरणेन भारतस्य ब्राहमणैः शीतलायां प्रायशः विजयः प्राप्तः। तैः कृतेषु टीकाकरणेष्वसफलतायाः क्रमः दक्षलक्ष–टीकाकरणेषु मात्रैका आसीत्।

शीतलायाः भवितव्य–मृत्योराशङ्कायाः मयान्मुक्तये सन् 1720 ईस्वीये तुर्किस्तानस्य तत्कालीन–ब्रिटिश–राजदूतेन स्वबालकानां टीकाकरणं भारतस्य ब्राह्मणैः करणाय निर्णयः कृतः। किमपि यूरोपीय–मनुष्यं वेधितं इदं प्रथमं टीकारणमासीत्। शीतलायाः सफलटीकारणेन प्रभाविता भूत्वा राजदूतस्य पत्नी बिटिशदेशेऽप्यस्य प्रारम्भकरणस्य अनुशंसां क्रतवती। आक्सफोर्ड– महानगरस्य तत्कालीन–धर्माधिकारिभिः (पादरियो द्वारा) चिकित्सकैश्च टीकाकरणस्य प्रबल–विरोधे भवति सति टीकारणस्य सफलतायाः प्रामाणितेन अन्ततः यूरोपीयैरस्मिन् विषये तथ्यात्मकाभिज्ञतामेकत्रीकरणं प्रारब्धम्। अस्मादनेकवर्षेभ्यः पश्चात् डॉ. एडवर्ड जेनर–महोदयेन स्वावश्यकतानां सुविधानां चामनुसारमस्मिन् किञ्चित् परिवर्तनं कृत्वा गावः शीतलायाः टीका इति विकसिता कृता यं वैक्सीन इति नाम्ना सम्पूर्णे विश्वे अजानत। लैटिन इति भाषायां गौ ''वैक्सा'' इति कथ्यते, अनेन अस्य ''वैक्सीन'' इति शब्दस्य व्युत्पत्तिः जाता।



प्रति सप्तमवर्षस्यान्तराले मार्चमासात् जूनमासस्य मध्यकालं यावत् प्रसरणीया–शीतला–नाम्नः प्राणान्तकरोगस्य टीकाकरणाय बनारस–इलाहाबाद–भिण्ड–नगराणां ब्राह्मणाः फरवरी–मासैव बंग–प्रदेशं प्रति प्रस्थानं कुर्वन्ति स्म गृहं गृहं गत्वा च टीकाकरणं कुर्वन्ति स्म। 10 फरवरी 1731 ईस्वीये श्री आर.कोल्टेन श्री ओलिवर कोल्टाय भारताद् एकं पत्रं लिखित्वा ज्ञानमकारयत यत् प्रायशः 1581 खिस्ताब्दे बंगाले गङ्गायास्तटे ''कासिम'' इति आपणस्य मार्गे स्थिते ''चम्पा'' इत्युपनरे ''धन्वन्तरि'' इति नाम्ना (आयुर्वेदस्य प्रसिद्धादिदेव–धन्वन्तरेरतिरिक्तेन केनाप्यन्येन) एकेन वैद्येन शीतलतायाः ''टीका'' इत्यस्यानुसन्धानं कृतम्।

आश्चर्यमस्ति यद् आयुर्वेदस्य तात्कालिके साहित्ये अस्योल्लेखमपि न प्राप्यते। यूरोपीयानामनुसारं तु सन् 1870 खिब्टाब्दं यावद् भारते ब्राह्मणैः टीकारणं प्रचलितमास्त। ततः यूरोपीयानां प्रतिरोधेन तेषां व्यापारनीत्या धार्मिकविरोधादिभिर्विविधैः कारणैरस्याः पद्धत्याः अस्तित्वस्य रक्षणं दुष्करमभवत्। अन्ततः यूरोपीयानां तथा यथा शासने अधिकारा वर्धिताः भारतस्य अन्येषां रिक्थानामिव भारतीयानां गौरवशालिन्याः टीकाकरणपद्धत्याः लोपोऽभवत्। बहुशः सम्भवोऽस्ति यद् विदेशीशासने आयुर्वेदस्य तात्कालिक–ग्रन्थेभ्यः केचिद् भागाः निष्काशिताः अभाविष्यन्त। कस्मादपि रोगाद् विरूद्धे रोग–प्रतिरोधकक्षमतामुत्पादनाय तस्य रोगस्य निर्बलान् जीवाणून् रोगिणः शरीरे प्रवेशनस्य इयं पद्धतिः पूर्णरूपेण भारतीयानां मौलिक– वैज्ञानिक–चिन्तनस्य परिणाम आसीत्। सन् 1767 खिब्टाब्दे डॉ.जे.जेड़ होलवेल महोदयेन लन्दन महानगस्य ''कॉलेज ऑफ फिजिशियंश'' इत्यस्याध्यक्षस्य अन्यसदस्यानाञ्च सम्मुखे उक्ते स्वभाषणे भारतस्य ब्राह्मणैः टीकाकरणस्य पद्धत्याः विस्तृतं वर्णनं वैज्ञानिक–विश्लेषणञ्च कृतम् आसीत्। डॉ. होलवेल–महोदयेन ब्रिटिशजनेभ्यः ज्ञानमकारयत् यच्छीतलायाः प्रकोपेन पीडिताः यूरोपीयाः पुरूषाः त्रिदिवसानामभ्यन्तरे मृत्योराखेटाः भवन्ति स्म यदा तु टीकाकरण–कृताः भारतीयाः मृत्योराखेटात् सुरक्षिताः भवन्ति स्म। तदा टीकाकरणस्य महत्त्वादनभिज्ञानां यूरोपीयानामीदृशीभ्यः वस्तीभ्यः मासेभ्यः पलायनमेव एकमात्र विकल्पमासीत् यत्किं ब्राह्मणैः कृतं टीकाकरणमुचितं न स्वीकुर्वन्ति स्म इमां पद्धतिं प्रति च भयभीता आसन्।

प्रसिद्ध–गान्धिवादिना प्रखर–चिन्तकेन अत्यन्त–परिश्रमेण भारतीय–ज्ञान–विज्ञानस्य कलायाश्च यः दायः तात्कालीन–यूरोपीयैः लिखितः अनेकानेकपत्राणां गहनाध्ययनेन अस्मभ्यं सम्पूर्ण–संसाराय चानावृतः कृतः अद्य च तं जनं–जनं यावत् प्रेषणं प्रत्येक–भारतीयस्य कर्त्तव्योऽस्ति। प्रस्तुतलेखः तस्य पुस्तके ''अठारवीं शताब्दी में भारत में विज्ञान एवं तन्त्र ज्ञान'' इत्यस्मिन् आधारितः अस्ति। धर्मपालेन विरचितमिदं पुस्तकमपि तस्य अन्यासां नवपुस्तकानामिव भारतस्य

गौरवपूर्णैतिहासिकोऽभिलेखोऽस्ति। अयमाश्चर्य–जनक–विचारणीय–विषयोऽस्ति यद् भारतस्यास्य दायस्य लेखनं संरक्षणं च भारतीयैः न कृत्वा यूरोपीयैः कृतम् यस्मिन् येन केनापि प्रकारेण तात्कालीनाङ्ग्ल–शासका अपि सम्मिलिता सन्ति तर्हि किं नास्माभिश्चास्मै कार्याय तान् प्रति कृतज्ञाः भवितव्याः ?

<u>ब्राह्मणानां टीकाकरणस्य निर्माणविधिः–</u> डॉ. होलवेलस्यानुसारं शीतलायाः पनसिकाभ्यः निःसरितं पूयं एकस्मिन् स्वच्छवस्त्रे संशुष्य पुनः दुग्धे उष्णजले च पातयित्वा संरक्षितं क्रियते स्म। पूयस्य सत्तवमेव आगामी–वर्षे टीकाकरणाय प्रयोगे उपयुज्यते स्म। किन्तु अस्मै शीतलायाः कस्य सामान्य–रोगिणः पनसिकाभ्यः निस्सारितं पूयं न नीत्वा टीकाकृतस्य पुरूषस्य पनसिकाभ्यः पूयस्य सङ्ग्रहणं क्रियते स्म। (अर्थात् ब्राह्मणाः इदं तथ्यम् अजानन् यट्टीका करणित–पुरूषस्य पनसिकाभ्यः निःसरिते पूयैव रोगाणूनां वाञ्छित–स्थितिरूपलभ्यते। निश्चितैव अस्मिन् सन्दर्भे भारतीयानां जीवाणु–विज्ञानस्य सूक्ष्माध्ययनस्य प्रशंसा कर्तव्या।) टीका कदापि नूतनपूयसत्त्वेन नोपयुज्यते स्म। टीकाकरणाय प्रयोजनीयं पूयम–निवार्यतः एकवर्षीयं प्राचीनमेव गृह्यते स्म तथापि पञ्चवर्षादधिकं प्राचीनं न।

<u>टीकाकरणस्यैकमाहपूर्वादेव पथ्यापथ्यस्य पालनमनिवार्यमासीत्</u> – येषां टीकाकरणमभिप्रेतमासीत् तस्मै एकमासपूर्वादेव भोजने मत्स्यं दुग्धं घृतञ्च अवरोध्यते स्म। अस्य निषेधस्य दृढ़तया पालनं कारयते स्म। डॉ. होलवेल–महोदयेन अस्य निषेधस्य विभिन्न–पक्षेषु गम्भीरतया चिन्तनोपरान्तमिदं वैज्ञानिकदृष्ट्या उचितं प्राप्तम्। तस्यानुसारं निषिद्धवस्तूनां सेवनेन अम्लता उत्पन्ना अभवत् येन कारणेन ईदृशाय पुरूषाय टीकाकरण–करणे स्थितिः गम्भीरा जायते स्म। शरीरे अम्लतोत्पन्नस्य स्थित्यां शरीरस्य रोग प्रतिरोधक–प्रणाल्याः क्षरणम् ईदृश्यां च स्थित्यां टीकारणस्य अनपेक्षित–परिणामानां विषयेषु अद्यैकविंशतितमशताब्द्याः जनाः सहजतयैवानुमानं कर्तुं शक्नुवन्ति।

<u>टीकाकरणस्य भारतीया पद्धतिः–</u> एकमासपूर्वान् निष्ठापूर्वकं पथ्यस्य पालयतः पुरूषस्यैव टीकाकरणाय ब्राह्मणैः चयनं क्रियते स्म। चयनित पुरूषस्येच्छानुसारं दक्षिणे वामे वा बाहौ स्वच्छवस्त्रेण टीकाकरणस्य स्थानं दशमिनटानि यावत् मर्दनं कुरूते स्म। यदा इदं प्रतीयते यत् तस्य स्थानस्य रक्त–प्रवाहः सामान्याद् अधिकोऽभूत् तदा रजतस्य लघुशस्त्रेण पञ्चदश मिनटानि यावन्निरन्तरं त्वचायाम् अल्पाल्प–विभिद्य रक्त–निर्गमनस्य स्थितिः निर्मीयते स्म। तत एकस्मिन् द्वितीये वस्त्रे शीतलायाः पूयस्य सत्त्वं योजयित्वा तं च गङ्गाजलस्य द्वि–त्रिबिन्दुभिः आद्रं कृत्वा निर्मिते व्रणस्थाने स्थापयित्वा वस्त्रेण बद्धयते स्म। यदा–कदा तु सामान्यरूपैव अछेद्यस्य स्थाने एकः बिन्दुः निपात्य वस्त्रेण बद्धयते स्म। अस्याः सम्पूर्णप्रक्रियायाः समये ब्राह्मणाः मन्त्रोच्चारणं कुर्वन्ति स्म।



भारते अद्यापि शीतलायाः अस्य प्रकारस्य च अन्येभ्यः विषाणु–जन्यरोगेभ्यः मुक्तये ''शीतलामातुः'' पूजनं ''माता पहुँचानी'' परम्परां प्रति जनास्थां दृष्टुं शक्यते। साम्प्रतमियं परम्परा एका रूढ़ि–मात्रा अवशिष्टा अस्ति अस्याः वैज्ञानिकस्वरूपं महत्त्वं च जनाः विस्मृतवन्तः सन्ति। अस्य प्रकारस्य सङ्क्रामक–रोगैः मृत्योः प्रमुखं कारणं विषाणुभिरूत्पन्नं तीव्रं विषं शरीरस्य प्रतिक्रियायाः स्वरूपे उत्पन्न–तीव्र–ज्वरस्य स्थितिरस्ति। इमं तीव्र–ज्वरं नियन्त्रणस्य शरीराभ्यन्तरे च प्रविष्टानां विषाणूनां संख्यां अनाधिक–वर्धनस्योद्देश्येनैव रौगिणः शरीराय शीतलतां प्रवेशनस्योपाया अभिप्रेता आसन् ये दुर्भाग्येन साम्प्रतं केवलं पूजा–पाठयोरन्धविश्वासे सीमिता सन्ति। डॉ. होलवेल शीतलायाः रोगिणः शीतलजलेन स्नानस्य वैज्ञानिक पक्षाणां गहनमध्ययनं कृतवान् इमं चोपयुक्तं प्राप्तवान्। स स्वयमेवापि अनेकेषु रोगिषु इमं प्रयुज्य तेषां प्राणरक्षणे सफलतां प्राप्तवान्। अद्याधुनिकटीकान् सुरक्षणाय तेषां निर्माण–समयादारभ्य उपयोगस्य समयं यावत् शीत–शृङ्खला सुरक्षिता कृता अस्ति।

डॉ. हेलवेलस्यानुसारं टीकाकृतं पुरूषं टीकाकरणस्य दिवसादारभ्य अग्रिमषड्दिवसानि यावत् मृत्तिकायाश्चतुर्घटेषु रात्रिं यावज्जलेषु पूरयित्वा अनने शीतलजलेन प्रातः सूर्योदयात्पूर्वे दिवसावसानस्य सायंकाले द्वादश–इञ्चदूरात् परिवेष्टकरूपे धारा–स्नानम् कारयते स्म। एतेषां षड्दिवसानामन्तरे तस्मै अल्प–ज्वर आयाति स्म ततश्च अल्प–संख्यायां मृदुस्वरूपस्य पिडिका उद्भवन्ति स्म। आभ्याः पिडिकाभ्याः निःसरितं पूयं सङ्ग्रहीत्य आगामिवर्षस्य टीकाकरणाय रक्षयते स्म। आसां पिडिकानामुपचारे अप्यासां स्फुटित्वा व्रण–पूरणं यावच्छीतल–जलेन स्नानमकारयत्। पथ्यपालनमागाम्येकं मासं यावद् भवति स्म। तस्मै ऋतुफलानि यथा कदलीइक्षु– कालिङ्गमादिभ्योऽतिरिक्तं भोजने रूपे तण्डुलानां श्वेत–खसति–लानाञ्च दलितकः दीयते स्म।

<u>शीतलायाः रोगिणः पिडिकानां शल्यचिकित्सा –</u> डॉ.होलवेलन शीतलायाः पिडिकानां ब्राह्मणैः कृतायाः शल्यचिकित्सायाः अपि वैज्ञानिकपक्षानां सूक्ष्मतया अध्ययनं कृतम् इयं च अधिकोपयुक्ता श्रेष्ठा च प्राप्ता। डॉ. हेलवेलस्यानुसारम् एतासां पिडिकानां शल्यचिकित्सायां प्रयुक्तयोच्चस्तरीयस्य तीक्ष्ण–सूचिकया भेदनस्य प्रक्रिया कया सूचिकया कर्तरिकया कर्तन्यादिभिः वा भेदनस्य छेदनस्य चापेचा अधिका वैज्ञानिकी श्रेष्ठा चासीत्। तेन (डॉ. होलवेलेन) स्पष्टरूपेण डॉ. टिसॉट–महोदयेन (डॉ.टिसॉटेन) एतासां पिडिकानां शल्यचिकित्सायै तीक्ष्णया कर्तरिकया कर्तित्वा पृथक्करणस्य तस्यानुशंसां वैज्ञानिक–कारणैरापत्तिजनकां स्वीकृतवान्। वास्तवे तीक्ष्णसूचिकया भित्वा पूय–निर्हरणस्य प्रक्रियायां धैर्यश्रमयोरपेक्षा भवति। भेदनस्योद्देश्यमासीत् त्वचायाः निरन्तरतां सुरक्षणं परन्तु तं समयं यावत् यूरोपीयैः चिकित्सकैः शल्यक्रियायैः सूचिकां शस्त्रस्येव प्रयोग–विषये विचारोऽपि न कृतः।

डॉ. टिसॉट सदृशाः जनास्तु पिडिकाः कर्तित्वा एव पूयस्य निर्हरण–करणस्य पक्षे आसन् यदा हि अनेन त्वचायाः एको बृहद्भागोऽन्येभ्यः सङ्क्रमणेभ्यः अनावृतो भूत्वा अन्यान् नूतनकष्टान् आमन्त्रणायोन्मुखोऽभवत्।

<u>आयुर्वेदस्य गौरवशाली–परम्परायाः संरक्षणस्य संवर्धनस्य च आवश्यकता</u> – आयुर्वेद चिकित्सा पद्धतिः भारतस्य अत्यन्त–समृद्धा गौरवशालिनि–परम्परा च भूतवत्यस्ति अस्याः सूत्राणि जनमानसे गाम्भीर्यं यावत् तथा सामाजिक–धार्मिक–परम्परासु पितामही–मातामहयोः योगास्वन्येषु रूपेष्वपि विद्यमानाः सन्ति। वयमपेक्षामहे यद देशस्य जनाः स्वामीषां गौरवशालिपरम्पराणां वास्तविक–स्वरूपस्य वैज्ञानिक–पक्षमवगम्य परम्पराः पालयिष्यन्ति। विषाणुजन्य–व्याधीनां शमने नियन्त्रणे च शरीराय शीतलतां प्रदानस्योपायः कर्त्तव्याः न तु शीतलामातुः मन्दिरे गत्वा अगरवर्तिकायाः धूम्रेण "माता पहुँचानी" इत्यस्याः रूढपरम्पराभिः विषाणूनां मातरं प्रसादनाय उपायाः कर्त्तव्याः। अत्यन्त–शीत–वातवरणं विषाणूनां वृद्धिमवरोधनं सहायकं भवति। कण्ठे गरलधारकेण शिवेन तु स्व निवासो हिमालये कृतः य इदमेव प्रतिपादयति यन्न केवलं विषाणवः अपितु विषस्य प्रभावोऽपि शीतल–वातावरणे क्षयति। टीकाया आविष्कारकाणां महद्ब्राह्मणा– नामुत्तराधिकरिणामुत्तरदायित्वं भवति यत्ते स्ववैज्ञानिक–परम्पराणां परिमार्जनं कृत्वा रूढिभ्यः भारतीय–समाजं मोचनस्य पुण्य–प्रयासान् कुर्वन्तु।

अयं रोमाञ्चक आनन्ददायको विषयोऽस्ति यद् अष्टादशशताब्द्याः भारते लक्षाणां संख्यायां प्राथमिक–विद्यालया आसन्। प्रतिचतुश्शतस्य जनसंख्यायामेको विद्यालयः सञ्चालितः क्रियते स्म। शासनस्य जनानाञ्च सहयोगेन सञ्चालितानामेषां विद्यालयानां सञ्चालन–व्यवस्था अद्भुता आसीत्। तदा भारते प्राथमिक–शिक्षां सर्वे जनाः प्राप्नुवन्ति स्म। शिक्षायाः ईदृशीं सुदृढव्यवस्थां वयं स्वतन्त्रता प्राप्तेः सप्तषष्टि–वर्षेष्वपि कर्तुं नाशक्नुम। भारते शिक्षायाः ईदृशीं सुदृढव्यवस्थां समाप्य आँग्लजनाः सर्वदा यावत् अस्मान् दासान् निर्मातुमैच्छन्।

अस्माकमार्जवस्य अज्ञानतायाः वा कारणेन व्यापाराय आगतैः आँग्लैः शनैः शनैः वयं दासाः कृताः।

लवङ्गोषण–मरिचार्द्रक–गन्धमल्कादीनां सदृशाणामुपस्कराणां वज्रस्वर्णयोश्चाकर्षणेन वैदेशिकाः भारते आक्रमणाय प्रेरिताः। अत्र दीर्घसमयावधि लुण्ठनस्योद्देश्येन भारतस्यान्तरिकव्यवस्थासु परिवर्तनस्य आवश्यकताया अनुभवः कृतः। भारतीय–ज्ञान–विज्ञानाभ्यां कलासंस्कृतिभ्यां आश्चर्यचकितानां यूरोपीयानां प्रवणता प्राप्तं प्रति भवनं इंग्लैण्डाय दूरगामी शुभपरिणामकारी नासीत्। मैकालेसदृशाणां साम्राज्यवादिनी अस्मात् चिन्तनं स्वाभाविकम् आसीत्। यूरोपस्य बहुभिः विद्वद्भिः भारतस्य प्रशंसया इयमाशङ्का बलवती प्रारब्धा यच्छक–हूणानामिव यूरोपीया अपि



भारते संयोज्य भविष्ये कुत्र स्वास्तित्वं विलुप्तो न कुर्युः। ब्रिटेनस्य ब्रिटिशवासिनाञ्च अस्तित्वं रक्षणं यूरोपाय आवश्यकमासीत्।

भारतमागन्तुकैः वैदेशिकैः स्व–स्व–रूचिभिः उद्देश्यैः भारतस्य सर्वेक्षणं कृत्वा स्व–स्व–हितेभ्यः निष्कर्षाः निःसारिताः। अनेनैव कारणेन यदा–यदा तेषां पारस्परिक–भिन्नता विरोधाभासश्च दृश्यते। स्पष्टः केचन यूरोपीय जनाः भारतीय–ज्ञान–विज्ञानयोः तत्कालीन– सुस्थापित–परम्परायां मूल्याङ्केन सह न्यायं कर्तुं न अशक्नुवन् मैकाले एतेष्वग्रण्यस्ति किन्तु सम्भवतः इदं कथनमधिकमुपयुक्तं भविष्यति यत्।

मैकाले महोदयस्य भारतं प्रत्युपेक्षित–दृष्ट्याः कारणेन तस्य मनसि उद्भूतस्थ भारतं प्रति भयस्य ईर्ष्यायाश्च भाव आसीत्। प्लेफेर ला–प्लास डेलाम्बे आदिभिः विद्वद्भिः सह सदैव ब्रिटिश–सत्ताधारिणां कर्मचारिणामपि मनस्सु भारतीय–ज्ञान–विज्ञानं प्रति सम्मानं समर्थन–चासीत्। अनेन व्यग्रो भूत्वा मैकाले इत्ययमालोचनां कुर्वन् अकथयत् "कस्य श्रेष्ठयूरोपीय–पुस्तकालस्यैकस्य उत्थितपिटकस्य लघ्वंश एवं भारतस्य अरबदेशानाञ्च समग्रदेशीयसाहित्यस्य तुल्यं मूल्यवान्नास्ति। महयं प्रतीयते यत् पूर्वीय–लेखकाः साहित्यस्य अस्मिन् क्षेत्रे सर्वोच्चाः सन्ति, तत् क्षेत्रं काव्यस्यास्ति किन्तु महयमद्यावधीदृश एकोऽपि विद्वान् न प्राप्तोऽस्ति य इदं कथितुं शक्यात् यन्महतां यूरोपीय–राष्ट्राणां कवितया सह अरबी–संस्कृत–काव्यस्य तुलनां कर्तुं शक्यते। अहं तु स्वीकरोमि यत् संस्कृते लिखितसमग्रसाहित्ये सङ्कलितज्ञानस्य ब्रिटिशस्य प्राथमिकशालासु प्रयुक्तेभ्यः लघुलेखेभ्योऽप्यल्पं मूल्यमस्ति"

मैकाले इत्ययं भारतीय–शिक्षाप्रणाल्या ज्ञानविज्ञानयोश्च प्रभावितानां यूरोपीय विदुषां सम्मोहनं भङ्गस्योद्देश्येन भारतीय–शिक्षा प्रणालीं प्रति स्वकीयं विरोधं प्रकटयन् ब्रिटिश–सत्तायै भयदर्शनस्यापि प्रयासं कृतवान्। "यदि शासनं भारतस्य वर्तमानां शिक्षा पद्धतिं यथावत् रक्षणस्य पक्षेऽस्ति तर्हि महयं समित्या अध्यक्षपदनिवृत्तस्य अनुमतिं प्रयच्छतु। महयं प्रतीयते यद् भारतीया– शिक्षा–पद्धतिः भ्रामका अस्ति अतः वयं स्वकीय–मान्यतासु दृढा भवितव्याः वर्तमान् परिप्रेक्ष्ये अस्मभ्यं सार्वजनिक–शिक्षा मण्डलं "Board of Public Instructions" सदृशं प्रतिष्ठापूर्णस्य नामधारणस्य कोऽप्यधिकारो नास्ति।

द्वितीये पक्षे वाल्टर–महोदयेन इदं स्वीकृतं यद् भारतः स्व–विध्यै विज्ञानाय च प्रसिद्धोऽस्ति। यूरोपीय–जनानां मनस्तु सन्निहितं भारतस्य प्रभूत–सम्पत्तिं सङ्ग्रहस्य लक्ष्यमासीत्। तस्यालोचयन् वाल्टर–महोदयेन इदमपि स्वीकृतं यद्–"भारतीया जनाः तातारजातिभ्योऽस्मत् (यूरोपीयेभ्यः) सदृशैः जनेभ्योऽपरिचिताः भवेयुः तदा ते जगतः सर्वेभ्यः सुखिनः जनाः भवेयुः।" परन्तु मैकाले इत्यस्य साम्राज्यवादिन्यां शोषक–

बुद्ध्यां तु किञ्चिदन्यं गणितं चलन्नासीत् सस्स्व–विचारान् प्रकटयन् अकथयत्–''हास्यास्पदेतिहासः (पुराणेतिहासः) मूर्खतापूर्णाध्यात्मशास्त्रं विवेकबुद्धयै अग्राह्यधर्मशास्त्रस्य भारेण भारितां शिक्षणकाले अन्यजनेषु निर्भराम् इमां शिक्षां च प्रापणस्य पश्चात् क्षुधया मृत्युं प्राप्नुवन्ति आजीवन–जनानामाश्रये जीवन्ति वा। इत्थं विवश–निर्मातृणां मूल्यहीनानां विदुषां पंक्तीः निर्मातरि शिक्षणे धनस्य दुरुपयोगं कुर्वन्नास्ते।

यदि स्वसमग्र–कार्य–पद्धतिः न परिवर्तते तर्हि अहं संस्थायै सर्वथा निरूपयोगी न अपित्ववरोधो भविष्यामि। अत एवाहं संस्थायाः सर्वेभ्य उत्तरदायित्वेभ्यः मुक्तो भवितुमिच्छामि।'' ''मैकाले इत्यस्येर्ष्यापूर्ण–प्रलापे प्रच्छन्नरूपेण यूरोपीय–समाजस्य प्राथमिकीनामावश्यकतानां पारिवारिक–सङ्घटनस्य च स्पष्टं प्रतिबिम्बं प्राप्यते। तेन शिक्षा ज्ञानस्य न अपितु धनोपार्जनस्य माध्यमा स्वीकृता। भारते विद्यार्थिनः परिवारे समाजे वा निर्भरता भारो वा न अपितूत्तरदायित्वं भवति। इमां परम्परां यूरोपीय परिवारस्य समाजस्य वा आकारे अवगमनं सम्भवो नास्ति। यावद् इतिहासस्य प्रश्नोऽस्ति भारतीय पुराणेतिहासात् ब्रिटिश–जनानां कोऽपि लाभो नास्ति परन्तु अस्मभ्यं तु सा (परम्परा) गौरवपूर्णा प्रेरणास्पदा च भवनेन अतिमहत्त्वपूर्णा अस्ति। धर्मम् अध्यात्मं च प्रति मैकाले इत्यस्य नकारात्मकाः विचाराः तस्य तदीयाः सन्ति नितान्त–व्यक्तिगताश्च सन्ति यान् सस्सपूर्णयूरोपीय–समाजे स्थापनस्यासफलं प्रयासमकरोत्। तस्मिन् समये यद्यपि मैकाले स्वधूर्ततायां सफलो जातः परन्तु भारतीय–ज्ञानं विज्ञानं कलां संस्कृति धर्मम् अध्यात्मं च प्रति यूरोपस्याकर्षणमद्यावधिः. समाप्तुं नाशक्नोत्।

अलेक्जेण्डर वाकर (1964–1831) भारते ऑग्लसेनायाः ब्रिगेडियर–जनरल'' आसीत् स ''टीपू'' इत्यस्य विरूद्धे अन्तिम–संग्रामे भागम् आग्रहणत्। स्व–भारत–प्रवासस्यानन्तरं वॉकर महोदयः अरबी–फारसी–संस्कृतभाषाणां बहुमूल्य–पाण्डु–लिपीनां सङ्कलनम् अकरोत् यत् तस्य पुत्रेण सर विलियमेन 1845 ईस्वीये वोडलेन (ऑक्सफॉर्ड) इत्यस्मै समर्पितम् यत्रेदं विशिष्ट–सङ्ग्रहस्य रूपे उपलब्धमस्ति।

भारते (मालाबारे) निवसन् 1920 ईस्वीये वॉकर महोदयेन लिखितम्–'' सामान्यतः हिन्दुभिः कृता कृषिः यूरोपीय–जनैः दोषपूर्णा कथिता। तेषामिदं दृष्टिकोणं कियदौचित्यपूर्णमस्ति? मालावारस्य कर्षव्यवसायः तेषां स्वकीयेतिहासादधिकः प्राचीनोऽस्ति। तेषां पवित्रपशुं गावं बलीवर्दं प्रति च सम्मानं श्रद्धाभावाः अपि च कृषिकर्मं प्रति तेषां सेवा–श्रद्धयोः द्योतकाः सन्ति। अस्माभिरस्मिन् तथ्येऽपि विधिवद् विचारः कर्तव्योऽस्ति यद् धान्यं भारतस्य महत्त्वपूर्णं शस्यमस्ति परन्तु तस्मै (शस्याय) अस्माकं यूरोपीय पद्धतिः कियती अनुकूला अस्ति? यदा तु धान्यस्य उत्पादनस्य यूरोपीयाः अनुभवहीनाः आसन्। अत्र कदलीफलमेकं ईदृशं फलमस्ति यत्तु आहारे अत्यन्तं पौष्टिकमस्ति। भारतस्य अनेकेषु भागेषु सुकन्दान्युत्पादयन्ते। अहमपश्यं



यत् ब्राह्मणाः तस्योपयोगं भोजनस्य रूपे कुर्वन्ति। तीक्ष्णकन्दाः अपि तथैव सुस्वादवः पौष्टिकाश्च भवन्ति। ममावगमने इयं न आयाति यद् भारताय वयम् ईदृशं किम् उपहार दातुं शक्नुमः? तेषां पार्श्वे तानि सर्वाणि धान्यानि सन्ति प्रत्युत तेभ्योऽप्यधिकानि सन्ति। अस्माकं फलानि प्रायशोऽम्लानि सन्ति ते चास्मिन् जलवाव्योः अङ्कुरितानि न भविष्यन्ति।''

''हिन्दुभिः दीर्धसमयात् वप्रित्रस्य आविष्कारः कृतः। मालावारस्य जनाः कृषिकार्यस्योद्देश्यानुरूपं विभिन्न–यन्त्रोपकरणानां प्रयोगं कुर्वन्ति यानि अस्माकम् आधुनिक–सुधारकारणैः साम्प्रतं इंग्लैण्डदेशेऽपि प्रयुक्तानि प्रारब्धानि सन्ति। भारतीय–कृषकाणां कानिचित् कृष्युपकरणान्यपूर्णानि सिद्धकरणस्य प्रयासः कर्तुं शक्यते किन्तु यथार्थः अयमस्ति यत् ते स्वकलायां पूर्णतां प्राप्ताः सन्ति।

हिन्दुकृषकाणां हलानामिव ग्रीकानां मिस्र–वासिनां हलेषु कुशिलानि न भवन्ति। दक्षिण– फ्रांसे उष्णदेशेष्वपि ईदृशानि हलानि प्रयुक्तानि क्रियन्ते। अस्यानुमानस्याधारे कथितुं शक्यते यत् क्षेत्रकर्षणस्य आरम्भमपि ते देशां अकरिष्यत् येषां भूमिः लघुः आर्द्रमृत्तिका युक्ता अभविष्यत्। ग्रीकवासिनः कृष्याः आविकष्कारकस्य रूपे ''बच्छू'' इति नामकं पुरूषं स्वीकुर्वन्ति। तेषां मान्यतानुसार ''बच्छू'' एवं प्रथमः पुरूष आसीत् यः भारतात् यूरोपे सर्वप्रथमं बलीवर्दान् नीत्वा आगच्छत्।''

''बच्छू'' शब्दः वत्सस्य ''बछड़ा'' इति शब्दस्य वा अपभ्रंशस्येव प्रतीयते। सम्भवोऽस्ति यद् भारताद् गावां वत्सान् यूरोपं नायकं पुरूषं ते ''बच्छू'' इति नाम्ना सम्बोधयेयुः।

सम्पूर्ण–यूरोपदेशे प्रथमवारे हलस्य प्रयोगः आस्ट्रियादेशस्य केरेंथिया–नाम्नि स्थाने जोसेफ लोकाटेली इति नाम्ना पुरूषेण 1662 ईस्वीये अकरोत्। इग्लैण्डे अस्य प्रयोगः 1730 खिस्ताब्दे प्रारब्धस्तु किन्त्वस्य व्यापकरूपेण प्रचलने आगमने प्रायशः 50 वर्षाण्यधिकानि व्यतीतानि।

अद्य एक–विंशशताब्द्याः सन्दर्भे पश्येम तदा यूरोपीयानां प्रवणता जैविकृषिं प्रति भवन्त्यस्ति। रासायनिकोर्वरकाणां स्थाने गोमयेन महत्त्वं प्रदानमारब्धमस्ति मस्ति। जैवयान्त्रिक्या बीजभागे रूपान्तरित शस्यानां दुष्प्रभावेभ्यः पश्चिमीजगता तु पाठः शिक्षितः किन्तु दुर्भाग्येन भारतोऽद्यावधि इमं पाठं शिक्षितुं न अशक्नोत्। विश्वाय कृषिकार्य–शिक्षको भारतः कृष्यै इजराइलं पश्चिमीय–देशान् प्रति च पश्यन्नस्ति। किमप्याश्चर्यं न सदस्याः शताब्द्या उत्तरार्धं यावत् यूरोपे टेक्टरयानस्य स्थाने बलीवर्दानां प्रचलनम् अवर्धत यत्किम् इयमेव (विधिः) अधिका प्राकृतिकी कल्याणकारिणि चास्ति।